| अथ महापातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| अज्ञानतस्तत्कर्तृकतत्स्वामिकतत्सुवर्णस्तेयम्। | द्वादशवार्षिकव्रतं स्त्रीबालवृद्धानामर्द्धम्। एकस्योभयधर्म्मवत्त्वे पादः। | १८० धेनवः। | ५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा | १०० गावः। अशक्तौ १०० कार्षापणाः। |
| ज्ञानतो गुर्व्वङ्गनागमनम्। अर्थात् विमातृगमनम्। शूद्रस्य ब्राह्मणीगमनञ्च। | गुरुतल्पगः पापमभिभाष्य तप्ते लौहमये सुप्यात्। ज्वलन्तीं लौहप्रतिमां कृष्णमयीं प्रतिमां वा आलिङ्ग्य म्रियेत। स्वयंवा शिश्नवृषणावुत्कृत्य अञ्जलौ निधाय आमरणात् नैर्ऋतीन्दिशमातिष्ठेत्। चतुर्विंशतिवार्षिकव्रतं वा कुर्य्यात्। गुर्वङ्गनयापि एतत् करणीयम्। | ३६० धेनवः। | १०८० कार्षापणाः। तन्मूल्यस्वर्णादि वा। | २०० गावः। अशक्तौ २०० कार्षापणाः। |
| अज्ञानतो गुर्व्वङ्गनागमः। | द्वादशवार्षिकव्रतम्। बालवृद्धयोरर्द्धम्। एतच्चातुर्वर्ण्य विषयम्। | १८० धेनवः। | ५४० कार्षापणाः। तन्मूल्यस्वर्णादि वा। | १०० गावः। अशक्तौ १०० कार्षापणाः। |
| चतुर्णां महापातकिनां संसर्गः। | ज्ञानतः सकृत् प्रथमसंसर्गिणोऽष्टादशवार्षिकव्रतम्। | २७० धेनवः। | ८१० कार्षापणाः। तन्मूल्यस्वर्णादि वा। | १५० गावः। अशक्तौ १५० कार्षापणाः। |
| तत्र गुरुसंसर्गो यथा। पतिताचार्य्यात् वेदाध्ययनम्। १। पतितशिष्याय वेदाध्यापनम्।२। पतितेन ऋत्विजा ज्योतिष्टोमादियजनम्।३। पतितस्य ज्योतिष्टोमादिनिष्पादनरूपयाजनम्। ४। पतितेन पतितया वा परिणयनम्।५। स्तेयादिपतितान्यब्राह्मणीगमनम्। ६। पतितान्नस्य पतितेन सहैकपात्रे भोजनम्।७। | अज्ञानतःसकृत्प्रथमसंसर्गिणो नववार्षिकव्रतम्। | १३५ धेनवः। | ४०५ कार्षापणाः। | ७५ गावः। अशक्तौ ७५ कार्षापणाः। |
| | ज्ञानतो द्वितीयसंसर्गिणः नववार्षिकव्रतम्। | १३५ धेनवः। | ४०५ कार्षापणाः। | ७५ गावः। अशक्तौ ७५ कार्षापणाः। |
| | अज्ञानतो द्वितीयसंसर्गिणः सार्द्धचतुर्वार्षिकव्रतम्। | ६८ धेनवः। | २०२॥० कार्षापणाः। | ३८ गावः। अशक्तौ ३७॥० कार्षापणाः। |
| | ज्ञानतस्तृतीयसंसर्गिणः षाड्वार्षिकव्रतम् | ९० धेनवः। | २७० कार्षापणाः। | ५० गावः। अशक्तौ ५० कार्षापणाः। |
| | अज्ञानतस्तृतीयसंसर्गिणस्त्रैवार्षिकव्रतम् | ४५ धेनवः। | १३५ कार्षापणाः। | २५ गावः। अशक्तौ २५ कार्षापणाः। |
| | ज्ञानाज्ञानतश्चतुर्थसंसर्गिणः प्रायश्चित्ताभावः। ब्रह्मघातिनां क्षत्रियवैश्यशूद्राणां ज्ञानाज्ञानतः संसर्गे तु क्रमेण एतस्य द्विगुणं त्रिगुणं चतुर्गुणं ज्ञेयम्। | | | |
| तत्र लघुसंसर्गो यथा। उपनयनं विना पतिताय वेदाध्यापनम्। १। पतितात्तादृशाध्ययनम्। २। पतितयजमानस्य अष्टकादियज्ञयाजनम्। ३। पतितेन ऋत्विजाष्टकादियज्ञयजनम्।४ पतितस्वब्राह्मणीगमनम्।५। पतितशूद्रागमनम्। ६। अपतितान्नस्य पतितेन सहैकपात्रे भोजनम्। ७। पतितोच्छिष्टभोजनम्।८। | ज्ञानतः षण्माससंसर्गप्रथमसंसर्गिणोऽष्टादशवार्षिकव्रतम्। | २७० धेनवः। | ८१० कार्षापणाः। | १५० गावः। अशक्तौ १५० कार्षापणाः। |
| | अज्ञानतः षण्माससंसर्गे प्रथमसंसर्गिणो नववार्षिकव्रतम्। | १३५ धेनवः। | ४०५ कार्षापणाः। | ७५ गावः। अशक्तौ ७५ कार्षापणाः। |
| | ज्ञानतः षण्माससंसर्गे द्वितीयसंसर्गिणो नववार्षिकव्रतम्। | १३५ धेनवः। | ४०५ कार्षापणाः। | ७५ गावः। अशक्तौ ७५ कार्षापणाः। |
| | अज्ञानतः षण्माससंसर्गे द्वितीयसंसर्गिणः सार्द्धचतुर्वार्षिकव्रतम्। | ६८ धेनवः। | २०२॥० कार्षापणाः। | ३८ गावः। अशक्तौ ३७॥० कार्षापणाः। |
| | ज्ञानतः षण्माससंसर्गे तृतीयसंसर्गिणः षाड्वार्षिकव्रतम्। | ९० धेनवः। | २७० कार्षापणाः। | ५० गावः। अशक्तौ ५० कार्षापणाः। |
| | अज्ञानतः षण्माससंसर्गे तृतीयसंसर्गिणस्त्रैवार्षिकव्रतम्। | ४५ धेनवः। | १३५ कार्षापणाः। | २५ गावः। अशक्तौ २५ कार्षापणाः। |
| | चतुर्थसंसर्गिणो ज्ञानाज्ञानतः प्रायश्चित्ताभावः। | | | |